ISSN PRINT 2319 1775 Online 2320 7876

Research paper ©2012 IJFANS. All Rights Reserved, UGC CARE Listed (Group-I) Journal Volume 8 , Iss1, 2019

# स्थितप्रज्ञस्य का भाषा?

**Dr. A Manoj Kumar**
Asst.Professor in Vedanta
Calicut Adarsha Vidyaapeetha ,Balussery
Mail Id: mk319102@gmail.com

अनादिकालंयावज्ज्वल्यमानः दीपस्तम्भोऽभवदयंभारतदेशः। पाश्चात्यानां पौरस्त्यानां वा विज्ञानकुतुकीनां समाश्रयभूरियम्। सांस्कृतिकपराणां धार्मिकपराणां कलासाहित्यिकपराणां दार्शनिकपराणां च समस्तानां मानविकमूल्यानाम् अधिकाधिकसमार्जने पर्याप्तोऽऽसीदयं देशः। सुदीर्घकालचरित्रेऽपि उपपञ्चशताब्धिपरिमितवयोयुक्तः आधुनिकविज्ञानस्याभूतपूर्वाभ्युदयः प्राचीनान्सर्वानतिशेरते। प्रवर्धमानानां प्रगतीनां सर्वेषामादरः सर्वात्मना कर्तव्यः, केनापि निराकर्तुं जहातुं वा न शक्यतेत्येतदनुभूयमानं सत्यमेव। सुपर्याप्तेनाधुनिकविज्ञानेन सह परमसुखसाफल्यार्थमाध्यात्मिकपठनानां पुनरवलोकनमपि मध्येमध्ये कर्तव्यमितिचिन्ता मे प्रवर्तते।

आधुनिकविज्ञानविभवानामकरः खलु विशिष्यपाश्चात्यदेशः। तत्रत्याः मनीषिणः भौतिकसम्पदां सर्वेषां सम्पन्ना अपि तत्रैव असन्तृप्ताः सुखस्य परिपूरणाय भारतदेशं, अत्रत्यान्वरिष्ठानाचार्यान् वा समाश्रयन्ते इत्येतच्चित्रं "न वित्तेन तर्पणीयो मनुष्यः"[1]इत्युपनिषद्वाक्यमनुस्मारयति। "यावत्स्थास्यन्ति गिरयः सरितश्च महीतले तावद्भविष्यति वेदेतिहासपुराणमीमांसादीनां प्रसक्तिः। तत्तच्छास्त्रमाधारीकृत्य अध्ययनानुसन्धानप्रक्रिया सदा सगौरवं प्रचलन्त्येव।

महाभारतमहाकाव्यस्य भीष्मपर्वण्यन्तर्गतः युद्धरङ्गे सारथिना श्रीकृष्णभगवता अर्जुनाय क्रियमाणोपदेशः श्रीमद्भगवद्गीता इति पृथक् ग्रन्थत्वेन प्रथते। अष्टादशाध्यायात्मकः सप्तशतश्लोकात्मकश्चायमुपदेशग्रन्थः समस्तोपनिषदां सारसंग्रहः भवति। मोक्षशास्त्रमिति एवं रीत्या विश्वे सर्वत्र प्रचारपूर्णः भवत्ययं ग्रन्थः उपदेशग्रन्थेतिरीत्या सर्वेषाम् आबालवृद्धानां सारल्येनार्थेन शैल्या च करतलामलकवत् प्रसिद्ध अतः "धर्मक्षेत्रेकुरुक्षेत्रे समवेताः युयुत्सवः, मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय"[2], "धर्मसंस्थापनार्थाय सम्भवामियुगे युगे"[3], "यदायदाहिधर्मस्यग्लानिर्भवति भारत"[4] "योगक्षेमंवहाम्यहम्"[5], "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन"[6]इत्यादीनां वाक्यशकलानामपरिचितः प्रायेण न कोऽपि स्यात्,इत्येवं प्रसिद्धिःग्रन्थस्यास्य वर्तते न केवलं भारते अपितु समस्ते जगति। विशिष्टव्याख्यानैः स्वमेधाशक्तिवर्धनाय धियश्शुद्ध्यै जगद्धितं पर्यालोचयितुं वा गीताशास्त्रमिदं बहूनां हेतुभूतं भवति। श्रीशङ्कर–रामानुज-माध्वैः श्रीधर-शङ्करानन्दप्रभृतिभिः, लोकमान्यबालगङ्गाधरतिलक–गान्धी-राधाकृष्ण-विनोबाप्रभृतिभिः,ज्ञानेश्वर-श्रीचिन्मय-सिद्धिनाथानन्द-चिदानन्दपुरीप्रभृतिभिराचार्यैःच बहुविधैः बहुधा क्रियमाणैः व्याख्योपाख्यैः भाषणैः ज्ञानयज्ञैश्च कालदेशसीमामतिक्रम्य गीतामृतमिदमग्रे प्रवहति।युद्धरङ्गेममताहङ्कारवशात् दुःखितस्यार्जुनस्य शोकनिवृत्यर्थं कृतोपदेशसन्दर्भः नातिदीर्घः तथापि वेदव्यासकर्तृत्वेन सप्तशतश्लोकं यावद्विस्तृतमभवत्। प्रायशः युद्धस्य प्राधान्यरहितेऽपि

---

[1]कठोपनिषद् १.२७
[2]भगवद्गीता १.१
[3]भगवद्गीता ४.८
[4]भगवद्गीता ४.७
[5]भगवद्गीता ९.२२
[6]भगवद्गीता २.४७

ISSN PRINT 2319 1775 Online 2320 7876

*Research paper* **©2012 IJFANS. All Rights Reserved**, **UGC CARE Listed (Group-I) Journal Volume 8 , Iss1, 2019**

अद्यतने कालेबहुविचारार्हः, यथा व्यक्तीनां सांसारिकबन्धः कथं भवति? बन्धकारणं किंभवति? बन्धनिवृत्तिः कथं भवति? कथंभवति पुरुषार्थप्राप्तिः? किंतस्य साधनम्? मुक्तस्य किंस्वरूपम्? तत्रकर्मणामुपयोगः कः?इत्यादीनां दार्शनिकविषयाणां सविस्तरप्रतिपादनेन शास्त्रमिदं प्रस्थानत्रयेषु स्मृतिप्रस्थानमिति प्रसिद्धिरवाप। प्रथमेऽध्याये अर्जुनस्य पतितामवस्थां प्रतिपाद्य द्वितीयेऽध्याये तद्दुःखनिवारणाय प्रवृत्तिनिवृत्तिरिति वेदोक्तौ धर्मावुपदिश्येते। परमात्मतत्त्वधिया तथा स्वधर्म इति दृष्ट्या अपि दुःखस्यार्हतानास्ति इति दृढं कथ्यते –"जातस्यहि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्यच, तस्मादपरिहार्येऽर्थे नत्वं शोचितुमर्हसि"[7], "स्वधर्ममितिचावेक्ष्य नविकम्पितुमर्हसि"[8]इति। यथा ईशावास्ये प्रथमेन मन्त्रेण ज्ञाननिष्ठा तदशक्तस्य तु द्वितीयेन कर्मनिष्ठा चोच्यते "कुर्वन्नेवेहकर्माणि जिजीविषेच्छतं समाः"[9] इति अधिकारिभेदेन। तथा कर्मबन्धंविना जीवितुं शक्यतेति कर्मयोगो निर्दिश्यते। सःकर्मयोगः सामान्यानांसर्वेषां प्रायोगिकतया स्वीकार्यः भवति, सःकर्मयोगः श्रुतिस्मृतिसम्मतः सर्वैः विश्वजनैः प्रशंसितः च भवति। "कर्मणा बद्ध्यते जन्तुः विद्यया च विमुच्यते"[10] इति वाक्यं स्पष्टयति यत्कर्म बन्धहेतुः इति। किन्तु विनाकर्म न शक्यते जीवितुं तत्रैव निष्कामकर्माचरणस्य योगबुद्धेः प्रसक्तिः, "योगः कर्मसु कौशलं"[11], "सिद्ध्यसिद्ध्योः समोभूत्वासमत्वंयोग उच्यते"[12] इत खलु गीतायामुक्तं योगशब्दनिर्वचनम्।

सर्वकर्मसन्यासपूर्विका ज्ञाननिष्ठा प्रथमं तावदुपदिश्यते, सा साङ्ख्यबुद्धिः। आत्मनः नित्यत्वं समर्थयित्वा हन्यमाने शरीरे आत्मा न हन्यते, देहस्य उत्पत्तिपरिणामनाशादिकंसम्भवत्येव। बाल्यकौमारादि-अवस्थाभेदेऽपि यथा तावद्दुःखं न विद्यते तथा अवस्थान्तरे मरणे प्राप्ते सति तीव्रदुःखस्यविषयो न भवति "कौमारं यौवनं जरा तथा देहान्तरप्राप्तौ धीरस्तत्र न मुह्यति"[13]इत्यादि बहुविधोक्त्या युक्त्या च दुःखं निवार्यते। सङ्गं त्यक्त्वा आत्मशुद्धयै योगस्थः कर्माणि कुर्वीत्युक्त्वा योगस्थितस्य जीवन्मुक्तस्य लक्षणमुच्यते।

"स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव।
स्थितधीः किं प्रभाषेत किमासीतव्रजेत किम्॥[14]"

कथं भवति स्थितप्रज्ञस्य व्यवहारः स्थिरा प्रज्ञा प्राप्ता चेत् कथं जीवति, अज्ञस्य ज्ञानिनश्च व्यवहारभेदःकः, किमस्ति योगस्थस्य वैशिष्ट्यम् इति सविस्तरं विचार्यते गीतायांद्वितीयाध्यायान्ते। अर्जुनस्य प्रश्नानुसृतं समाधानं तु भगवता क्रमशः दीयते।

"प्रजहाति यथा कामान्सर्वान् पार्थ!मनोगतान्।
आत्मन्येवात्मनातुष्टः स्थितप्रज्ञस्तथोच्यते॥[15]"

इति। आत्मैव नित्यमेकं सत्यं वस्तु इत्यवगमात् आत्मन्येवसन्तुष्टः सर्वान् मनोगतान् कामान् परित्यजति। कामादेव क्रोधः, क्रोधादेव प्रणाशइति प्रसिद्धिः,"कामात्क्रोधोऽभिजायते"[16] इति खलु भगवद्वाक्यम्।

---

[7]भगवद्गीता २.२७
[8]भगवद्गीता २.३१
[9]ईशावास्योपनिषद् २
[10]महाभारतम् १२.२३३.७
[11]भगवद्गीता २.५०
[12]भगवद्गीता २.४८
[13]भगवद्गीता २.१३
[14]भगवद्गीता २.५४
[15]भगवद्गीता २.५५
[16]भगवद्गीता २.६३

ISSN PRINT 2319 1775 Online 2320 7876

*Research paper* **©2012 IJFANS. All Rights Reserved**, UGC CARE Listed (Group-I) Journal Volume 8 , Iss1, 2019

एवमप्युच्यते – "मन एव मनुष्याणां कारणं बन्धमोक्षयोः"[17] इति "किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोकः"[18] इत्युपनिषद्वाक्येन स्पष्टं भवति आत्मज्ञस्य कर्मबन्धराहित्यम्।

"दुखेष्वनुद्विग्नमनः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥[19]"

स्थिरा धीः यस्य तस्य नित्यात्मबुद्धस्य स्थितप्रज्ञस्य दुःखविषयेष्वनुद्वेगः, तथा सुखविषयेषु स्पृहाराहित्यं च भवति।अत एव भयक्रोधादिकं विशेषेण गतः भवदुःखविमुखः इति स्थितप्रज्ञस्यावस्थां वर्णयति ततः-

"यः सर्वत्रानभिस्नेहः तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति नद्वेष्टितस्य प्रज्ञा प्रतिष्ठिता॥[20]"

यः विवेकी शुभकार्येषु अभिनन्दनम्अशुभेषु विद्वेषं वा न प्रकटयति, सःन लौकिकः किन्तु जीवन्मुक्तः स्थितप्रज्ञ एव। तस्य स्वभावः किमिवेति उपमया प्रतिपाद्यते-

"यथा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता॥[21]"

इति।कूर्मः यथा तस्य अङ्गानि प्रतिकूले जाते विषयेभ्यः निवर्तते, तथा अनुकूले हस्तपादशिरादिकं बहिः प्रसार्य स्वतन्त्रं यथा गमनादिकं क्रियते, प्रवर्तयितुम् अनुनिमिषं जागरूको भवति। तथा ज्ञानी अनुकूलेषु विषयेषु भागं गृहीत्वा प्रतिकूले निवर्तते। अनासक्तः सन् स्थितप्रज्ञः कायेन्द्रियमनसां संयमेन जीवति। "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्"[22] धीरं विवेकिनम् इन्द्रियविषयाः न बाधन्ते इति खलु काठकोक्तेः तात्पर्यम्। तथा इन्द्रियार्थेभ्यः शब्दादिभ्यः प्रत्येकमिन्द्रियं निवर्त्ययाथार्थ्यमवगच्छति। अन्यथा इन्द्रियाणां यथेष्टव्यवहारे मनः ज्ञानिनामपि अपह्रीयेत "वायुर्नावमिवाम्भसि"[23], "शब्दादिभिःपञ्चभिरेव पञ्चपञ्चत्वमापुः"[24] इति श्रीशङ्करवचनं विषयाणामनर्थहेतुत्वं स्पष्टयति।

"तानिसर्वाणि संयम्य युक्त आसीत मत्परः।
वशेहि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥[25]"

इति। श्रोत्रादीनीन्द्रियाणि विषयेभ्यः प्रतिनिवर्त्य मत्परः परमात्मभावेन मयि सन्निवेश्य यः प्रवर्तते तस्य प्रज्ञा प्रतिष्ठिता भवति, न चञ्चला। अनन्य इति चिन्तयतां योगक्षेमं निर्वहतीति अत्रैव उच्चते।

"इन्द्रियजयादेव मनोजयः, मनोजय एव आनन्दः" इत्युक्तिः प्रसिद्धा। वेदान्ते जीवन्मुक्तस्य अवस्थावर्णनवेलायां तथा "पुष्करपलाशोआपो न श्लिष्यते"[26] "कुर्वन्नपि न लिप्यते"[27] "लिप्यते न सपापेन पदमपत्रमिवाम्भसा"[28] इति नानारीत्या स्थितप्रज्ञत्वं निर्विकारत्वं बन्धराहित्यं चस्पष्टीक्रियते। कुर्मोऽङ्गानां तुलनं जीर्णवाससां चोपमा सर्वेषां जनानां स्पष्टं प्रतिभाति। एवमात्मतत्त्वप्रतिपादने लौकिकोदाहरणानि अत्र सुलभानि

---

[17]अमृतबिन्दूपनिषद् २
[18]बृहदारण्यकोपनिषद् ४.४.२२
[19]भगवद्गीता २.५६
[20]भगवद्गीता २.५७
[21]भगवद्गीता २.५८
[22]कठोपनिषद् २.१.१
[23]भगवद्गीता २.६७
[24]विवेकचूडामणिः ७६
[25]भगवद्गीता २.६१
[26]छान्दोग्योपनिषद् ४.१४.३
[27]भगवद्गीता ५.७
[28]भगवद्गीता ५.१०

ISSN PRINT 2319 1775 Online 2320 7876

Research paper ©2012 IJFANS. All Rights Reserved, UGC CARE Listed (Group-I) Journal Volume 8 , Iss1, 2019

भवन्ति। अतः बहवः व्याख्यातारः अध्येतारः सदा गीताशास्त्रस्य वर्तन्ते। पार्थायप्रतिबोधितं गीतामृतमत्यन्तं महदेव इति शम्।

********

**सहायकग्रन्थसूची**


**कठोपनिषद्**- शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी,

**ईशावास्योपनिषद्**- शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी,

**बृहदारण्यकोपनिषद्**- शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी,

**छान्दोग्योपनिषद्**- शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी,

**महाभारतम्**– श्रीमद्वेदव्यासप्रणीतम्, गीताप्रेस, गोरखपुर, २०१७

**भगवद्गीता** - शाङ्करभाष्यसहिता, गीताप्रेस गोरखपुर, सं.वि.सं.२०७०

**विवेकचूडामणिः** - शङ्कराचार्यविरचिता – अरविन्दानन्दयतिना प्रणीता अद्वैतामृतबोधिन्याख्यटीकायुता, चौखम्बा विद्याभवन, १९९८.


********